# गजलद्वयी

**कौशल तिवारी**
बाराँ, राजस्थान

**यादृशस्तादृशो** न स्वीकृतो ह्यहम् ।
पादपूरणायैव प्रयुक्तो ह्यहम् ।।

न वांछामि श्रोतुं ते वचनानि,
ध्याननिमग्नो मदिरालयस्थो ह्यहम्।।

बहुस्निग्धतया मां नु स्पृश प्रिये!,
प्रणयजगत्यस्मिन् कार्पासिको ह्यहम्।।

सौंदर्ये ते वृद्धिमेव करोमि वै,
कपोलभित्तौ प्रसृतरवंकरो ह्यहम्।।

मूल्यबोधनाय विपणिं जिगमिषामि,
केनापि भूमिगूढमाणिक्यो ह्यहम्।।

**कार्ये** निर्गते तैरहो,
तृणभैरवत्त्यक्तोऽहम्।।

तस्यास्सभाया मयि निर्गते,
श्रुतम्मया तयाऽऽहूतोऽहम्।।

नवपापाय तत्परोऽस्मि,
गङ्गाजलेन स्नातोऽहम्।।

अत्रागत्य विस्मृतं यत्,
कस्मै ततः प्रेषितोऽहम्।।

येन ह्यः कोऽपि हतो मया,
तेनैवाधुना हतोऽहम्।।

यादृशोऽस्मि स्वीकरोतु,
त्वरायां तेन रचितोऽहम्।।